# Shiva Stuti Jnanarikrita

# જ્ઞાનારિકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Shiva Stuti Jnanarikrita

File name : shivastutiHjnAnArikRRitA.itx

Category : shiva, mudgalapurANa, stuti

Location : doc_shiva

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 44 | 3.44. 17-27||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# જ્ઞાનારિકૃતા શિવસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
જ્ઞાનારિરુવાચ ।
નમસ્તે શઙ્કરાયૈવ પાર્વતીસહિતાય તે ।
વૃષધ્વજાય શૈલાદિવાહનાય નમો નમઃ ॥ ૧૭ ॥
અવ્યક્તદેવાય ચ શિવાય શૂલપ્રધારિણે ।
નિર્ગુણાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૧૮ ॥
સદાશિવાય માયાયા આધારાય નમો નમઃ ।
માયામોહવિહીનાય શમ્ભવે તે નમો નમઃ ॥ ૧૯ ॥
સૃષ્ટેઃ કર્ત્રે ચ પાત્રે તે સંહર્ત્રે ત્રિસ્વરૂપિણે ।
અનાથાય ચ સર્વેષાં નાથાય પરમાત્મને ॥ ૨૦ ॥
ચરાચરસ્વરૂપાય નમોઽચરચરાત્મને ।
મહાદેવાય દેવાનાં પતયે તે નમો નમઃ ॥ ૨૧ ॥
મનોવાગતિરૂપાય યોગિધ્યેયાય તે નમઃ ।
યોગિનાં પતયે ચૈવ મહેશ્વર નમોઽસ્તુ તે ॥ ૨૨ ॥
ધન્યો વંશો મદીયોઽદ્ય યેન દૃષ્ટો મહેશ્વરઃ ।
તપો જ્ઞાનં પિતા માતા ધન્યા મે નાઽત્ર સંશયઃ ॥ ૨૩ ॥
પ્રસન્નોઽસિ મહેશાન તદા દેહિ મહાપ્રભો ।
ચરાચરસ્ય વૈ રાજ્યં તસ્માન્ મૃત્યુર્ન મે ભવેત્ ॥ ૨૪ ॥
યદ્યદિચ્છામિ દેવેશ તત્તત્ સિદ્ધ્યતુ સર્વદા ।
આરોગ્યાદિ સમાયુક્તં માં કુરુષ્વ સદાશિવ ॥ ૨૫ ॥
તથેતિ શિવ ઊચે તમન્તર્ધાનં ચકાર હ ।
સ દૈત્યો હર્ષિતોઽત્યન્તં સ્વગૃહં પ્રત્યપદ્યત ॥ ૨૬ ॥
(ફલશ્રુતિઃ)
જ્ઞાનારિકૃતમેતત્તુ સ્તોત્રં પઠતિ યો નરઃ ।
શ‌ૃણોતિ શઙ્કરસ્તસ્મૈ વાઞ્છિતં દદતે પરમ્ ॥ ૨૭ ॥

ઇતિ જ્ઞાનારિકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૪૪ । ૩.૪૪। ૧૭-૨૭॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 44 . 3.44. 17-27..

Proofread by Yash Khasbage, Preeti Bhandare

*Shiva Stuti Jnanarikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*